# anugItA from Bharatamanjari of Kshemendra

# અનુગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : anugItA from Bharatamanjari of Kshemendra

File name : anugItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# અનુગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

કૃષ્ણેનાશ્વાસ્યમાનોઽથ મુનિભિર્ભ્રાતૃભિસ્તથા ।
અશ્વમેધધૃતોદ્યોગો ધૃતિં લેભે યુધિષ્ઠિરઃ ॥ ૧૪.૫૦॥

દ્રષ્ટું તતઃ પ્રજાકાર્યં પ્રવૃત્તે ધર્મનન્દને ।
અન્તર્દધે તમામન્ત્ર્ય સર્વં તન્મુનિમણ્ડલમ્ ॥ ૧૪.૫૧॥

હેમરત્નલતાકાન્તે વિકાસિકનકામ્બુજે ।
અથ કૃષ્ણૌ સભોદ્યાને સ્વૈરં પ્રીત્યા વિજહ્રતુઃ ॥ ૧૪.૫૨॥

કથાન્તે તત્ર કંસારિં સુભદ્રાવલ્લભોઽવદત્ ।
યુદ્ધારમ્ભે ત્વયોક્તં યત્સર્વં તન્મમ વિસ્મૃતમ્ ॥ ૧૪.૫૩॥

વિસૃષ્ટં પરમાર્થજ્ઞ જ્ઞાનં તત્પુનરુચ્યતામ્ ।
ઇત્યુક્તઃ પાણ્ડુપુત્રેણ વિષણ્ણઃ કેશવોઽબ્રવીત્ ॥ ૧૪.૫૪॥

અહો ત્વયાવધાનેન ન શ્રુતં તદબુદ્ધિના ।
ન શક્યતે પુનર્વક્તું તથાપિ શ્રૂયતામિદમ્ ॥ ૧૪.૫૫॥

બ્રાહ્મણેન પુરા કશ્ચિજ્જીવન્મુક્તદશાં શ્રિતઃ ।
સિદ્ધઃ પૃષ્ટોઽવદત્સર્વં વિજ્ઞાય ભવવિભ્રમમ્ ॥ ૧૪.૫૬॥

અસ્મિન્નસત્યસઙ્ઘાતે ભૂતાનાં પાઞ્ચભૌતિકે ।
ગુણૈર્નિબદ્ધઃ પક્ષીવ જીવસ્તિષ્ઠતિ પઞ્જરે ॥ ૧૪.૫૭॥

અહઙ્કારૈકસારાણાં દેહિનાં વિસ્મૃતાત્મનામ્ ।
ચક્રવત્પરિવર્તન્તે સુખદુઃખક્ષયોદયાઃ ॥ ૧૪.૫૮॥

દેહાન્તે કર્મસંસર્ગાજ્જન્તવઃ શુભદુષ્કૃતૈઃ ।
તારારૂપા વિમાનાનિ ભજન્તે નરકાણિ વા ॥ ૧૪.૫૯॥

તતો ભોગક્ષયે ગર્ભં જરાયુપરિવેષ્ટિતમ્ ।
શુક્રરૂપો વિશત્યાત્મા યોન્યાં શોણિતસમ્પ્લુતઃ ॥ ૧૪.૬૦॥

નિઃશ્વાસાગ્રૈર્યથા વારિ લીયતે દર્પણોદરે ।
નિર્ધૂતસ્ય યથા વહ્નેરૂષ્મા વ્યોમ્નિ પ્રસર્પતિ ॥ ૧૪.૬૧॥

યથા વા કુસુમામોદઃ પ્રવિશત્યન્તરેઽનિલે ।
રાગઃ સઙ્ક્રાન્તિમાયાતિ સરન્ધ્રે સ્ફટિકે યથા ॥ ૧૪.૬૨॥

તથા દુર્લક્ષ્યસઞ્ચારો ગર્ભમાત્મા પ્રધાવતિ ।
બિભ્રાણો વાસનામન્તઃ શીતસ્પર્શમિવાનિલઃ ॥ ૧૪.૬૩॥

જાતસ્ય જાયતે તસ્ય વર્ધમાનસ્ય વર્ધતે ।
તૃષ્ણાતન્તુર્ભિ(ર્વિ)સસ્યેવ શુષ્યતો ન તુ શુષ્યતિ ॥ ૧૪.૬૪॥

વિવેકાદ્દુઃખસંયોગાદ્વૈરાગ્યં ગાઢમાશ્રિતઃ ।
નાહમસસ્મીતિ મન્ત્રેણ મુચ્યતે બ્રહ્મદીક્ષિતઃ ॥ ૧૪.૬૫॥

પૂર્વં ભાવેષુ નિર્વાણસ્તતઃ કારણવૃત્તિષુ ।
નિરાલમ્બદશામેત્ય યોગી બ્રહ્મણિ લીયતે ॥ ૧૪.૬૬॥

સર્વતઃ પાણિચરણં સર્વવ્યાપિનમવ્યયમ્ ।
આત્માનં સ પરિજ્ઞાય સત્યામેતાં ભવસ્થિતિમ્ ॥ ૧૪.૬૭॥

ઇત્યુક્ત્વા બ્રાહ્મણં સિદ્ધઃ સહસાન્તરધીયત ।
ઇદમન્યચ્ચ કૌન્તેય શ્રેયસે પ્રયતઃ શ‍ૃણુ ॥ ૧૪.૬૮॥

ઉવાચ બ્રાહ્મણી કાચિદ્ભર્તારં વિજને પુરા ।
ગમિષ્યામિ ગતિં સાધ્વી કામહં ત્વત્પરાયણા ॥ ૧૪.૬૯॥

ઇતિ પૃષ્ટસ્તયા વિપ્રસ્તામુવાચ સ્મિતાનનઃ ।
અગ્નિર્વૈશ્વાનરો નામ સ્થિતોઽન્તઃ કિલ દેહિનામ્ ॥ ૧૪.૭૦॥

ઇન્દ્રિયાણિ મનોબુદ્ધિસ્તસ્ય સપ્તાર્ચિષ સ્મૃતાઃ ।
વિષયાશ્ચાસ્ય સમિધો ભોક્તારઃ સપ્ત ચર્ત્વિજઃ ।
તસ્મિન્હતે સર્વમિદં જાયતે ચ પુનઃ પુનઃ ॥ ૧૪.૭૧॥

ઇન્દ્રિયાણીવ મનસો મનસ્તેષાં ચ સર્વદા ।
પરસ્પરોપકારેણ પ્રીયતે દેહસઙ્ગમે ॥ ૧૪.૭૨॥

મનોબુદ્ધિપ્રભૃતયઃ સપ્તેન્દ્રિયમૃગાઃ પુરા ।
અતર્કેણૈવ નિહતા રાજ્ઞા યોગમયૈઃ શરૈઃ ॥ ૧૪.૭૩॥

જિતેન્દ્રિયસ્ય નો કિઞ્ચિદિદં તસ્યૈવ ચાખિલમ્ ।

વિષયા વિષયસ્યેતિ જનકો વિપ્રમભ્યદાત્ ॥ ૧૪.૭૪॥

તસ્માદસક્તમનસા દૃષ્ટ્વા સર્વમિદં મયા ।
ત્યક્તં પરાવરજ્ઞેન ભવાવિર્ભાવશાન્તયે ॥ ૧૪.૭૫॥

ગતિસ્તવાપિ કલ્યાણિ મદ્ભાવસદૃશી સદા ।
બ્રહ્મારણીસમુદ્ભૂતં જાનીહિ જ્ઞાનપાવકમ્ ॥ ૧૪.૭૬॥

એતત્પત્યુર્વચઃ શ્રુત્વા બ્રાહ્મણી તત્ત્વદર્શિની ।
ક્ષેત્રક્ષેત્રજ્ઞવિજ્ઞાનં પરં પ્રાવીણ્યમાયયૌ ॥ ૧૪.૭૭॥

શ્રુત્વૈતદર્જુનઃ કૃષ્ણં બભાષે વિસ્મયાકુલઃ ।
યોગીન્દ્રો બ્રાહ્મણઃ કોઽસૌ ક્વાસ્તે વા સા ચ તદ્વધૂઃ ॥ ૧૪.૭૮॥

ઇત્યુક્તઃ કૈટભારાતિઃ પુનરૂચે ધનઞ્જયમ્ ।
શિષ્યેણ પૃષ્ટઃ સર્વજ્ઞઃ પુરા ગુરુરભાષત ॥ ૧૪.૭૯॥

બૃહસ્પતિપ્રભૃતિભિર્મુનીન્દ્રૈઃ સર્વદર્શિભિઃ ।
શ્રુતેયં ભવવિચ્છેદકથા પ્રોક્તા સ્વયમ્ભુવા ॥ ૧૪.૮૦॥

ગુણત્રયનિબદ્ધાનાં કર્મભેદવિકારિણામ્ ।
ભાવોઽયં પ્રાણિનાં શશ્વદલ્પોઽપ્યાયાત્યનલ્પતામ્ ॥ ૧૪.૮૧॥

વિચિત્રઃ કિલ સર્ગોઽયમહઙ્કારાદ્વિનિર્ગતઃ ।
તસ્મિન્નેવ લયં યાતિ શ્વભ્રે પુષ્પચયો યથા ॥ ૧૪.૮૨॥

જન્માન્તરશતાભ્યાસાદન્તરઙ્ગત્વમાગતઃ ।
અહઙ્કારઃ સ મનસો લીલયા કેન ભેદ્યતે ॥ ૧૪.૮૩॥

અવિદ્યા તાનવેનૈવ શનૈઃ સન્ન્યસ્તકર્મણઃ ।
વિકલ્પદ્વન્દ્વવિરતૌ જ્ઞાનાલોકઃ પ્રજાયતે ॥ ૧૪.૮૪॥

જ્ઞાનાગ્નિના પ્રવૃદ્ધેન દગ્ધ્વા ભવવિષદ્રુમમ્ ।
સર્વગ્રન્થિવિનિર્મુક્તઃ પરમામૃતમશ્નુતે ॥ ૧૪.૮૫॥

ઇતિ બ્રહ્મોદિતં જ્ઞાનં શિષ્યાય ગુરુણા પુરા ।
નાનાનિદર્શનોપેતં કથિતં ભવશાન્તયે ॥ ૧૪.૮૬॥

અહમેવ ગુરુઃ પાર્થ શિષ્યશ્ચ ત્વં સમો મમ ।
ઇત્યુક્ત્વા જ્ઞાનસર્વસ્વં વિરરામ જનાર્દનઃ ॥ ૧૪.૮૭॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા અનુગીતા સમાપ્તા ।

*anugItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*